॥ ओः ॥

# जैनेन्द्रव्याकरणस्य प्रस्तावः ।

भास्कराचार्यकृतलीलावत्यामन्ते

"अष्टौ व्याकरणानि षट् च भिषजां व्याचष्ट ताः संहिताः
षट् तर्कान् गणितानि पञ्च चतुरो वेदानधीते स्म यः ।
रत्नानां त्रितयं द्वयं च बुबुधे मीमांसयोरन्तरं
सद्ब्रह्मैकमगाधबोधमहिमा सोऽस्याः कविर्भास्करः॥" (१)

इति पद्यं दृष्ट्वा कान्यष्टौ व्याकरणानीति विवेचयन् कविकल्पद्रुमाभिधे धातुपाठे बोपदेवेनोक्तम्

"इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः ।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः ॥"

इदं पद्यमवलोक्य एतान्येवाष्टौ व्याकरणानीति निश्चितवान् । ततो जैनेन्द्रव्याकरणमन्विष्यन् चिरेण वाराणस्यामेकस्य जैनस्य पुस्तकसंग्रहे देवनन्दिमुनिकृतस्य जैनेन्द्रव्याकरणस्याभयनन्दिमुनिकृतमहावृत्तिसहितस्यैकं पुस्तकमुपलब्धवान् किन्त्विदं पुस्तकं प्राचीनं स्थलविशेषेषु

( १ ) कलिकातास्थस्कूलबुक्सोसाइटीसमाजद्वारा मुद्रिते पुस्तके द्रष्टव्यम् । प्रक्षिप्तमिदं पद्यं न तु भास्कराचार्येण कृतमिति केचन मन्यन्ते । तथात्वेऽपि केनचिद्बहुज्ञेन रचितमिति नास्त्यत्र शङ्कावकाशः ।